इत्यादिक्रमस्यानुसारेण जन्मनक्षत्रावधितत्तद्दशाधिपानामनुक्रमेण या दशा सा आरोहिणी तेषु चन्द्रादिपर्य्यन्तानां क्रमेण यथासम्भवं तेषामेव भोगेन पुनरवरोहेण सूर्य्यादीनां या दशा सावरोहिणी। तथाहि “आग्नेयादि विराद्वत्या तानि विंशोत्तरीयके” इत्युक्तदिशा जन्मनक्षत्रानुसारेण दशाधिपे आनीते तदुत्तरं तदुत्तरोत्तरपठितानां ग्रहाणां दशा। तत्र यस्य सूर्य्यदशायां जन्म तस्य आरोहिण्येव दशा यस्य तु चन्द्रादिदशायां जन्म तस्य तदुत्तरारोहक्रमेण कुजादिदशा आरोहिणी एवं शुक्रान्तदशाः परिसमाप्य सूर्य्यादीनां या दशा सैव अवरोहिणीति व्यपदिश्यते इति सम्प्रदायविदः। अन्ये तु स्वस्वभोग्यकालस्यार्द्धे प्रथममारोहिणी दशा शेषार्द्धे अवरोहिणीत्याहुः। सा च ग्रहविशेषे विशेषफलदा। यथोक्तम् “उच्चाङ्गपञ्चभस्यस्य दशा स्यादवरोहिणी। तस्यामल्पमवाप्नोति फलं क्लेशाच्छुभं नरः। मित्रोच्चांशगतस्यैषा नूनं मध्यफला भवेत्। सैवानिष्टफलानर्थां नीचार्य्यंशगतस्य च। नीचाङ्गपञ्चभस्यस्य दशावरोहिणी मता। तस्यां शुभफलं स्वेष्टमल्पं क्लेशादेव जायते। शत्रुनीचांशगस्यैषा किञ्चित्कष्टफलाऽधमा। मित्रोच्चांशगतस्यास्य सैव सम्पूर्णदा मता”। इति सामान्यतोऽभिधाय” “दशाऽवरोहा दिननायकस्य कृषिक्रियावित्तगृहेष्टनाशम्। चौराग्निपीड़ां कलहं विरोधं नरेशकोपं कुरुते विदेशम्” सू०। “निशाकरस्याप्यवरोहकाले स्त्रीपुत्रमित्राम्बरसौख्यहानिम्। मनोविकारं स्वजनैर्विरोधं चौराग्निभूतैर्लयमेति कष्टम्”।च०।“धरासुतस्याप्यवरोहकाले स्थानार्थनाशं कलिकोपदुःखम्। विदेशवासं स्वजनैर्विरोधं चौराग्निभूपैः सततं करोति”।म०।“शशाङ्कसूनोस्त्ववरोहिणी या दशा महत्कष्टतरं तु दत्ते। विज्ञानहीनं परदारसङ्गं न्वपाग्निचौरैर्भयमत्र कष्टम्”।बु०। “देवेन्द्रपूज्यस्य दशाऽवरोहा करोति सौख्यं सकृदेव नाशम्। सकृद्यशःकान्तिविशेषजालं नरेश्वरत्वं सकृदेव याति”।वृ०।“भृगोः सुतस्याप्यवरोहकाले प्रचण्डवेश्यागमनं धनाप्तिम्। स्त्रीपुत्रबन्ध्वार्त्तिमनोविकारम् भूमूलरोगं मदनार्त्तिमेति” शु०। “दिनेशसूनोस्त्ववरोहकाले राज्यच्युतिं दारसुतार्थनाशम्। भाग्यक्षयं भूपतिकोपयुक्तं प्रेष्यत्वमायाति गुदाक्षिरोगम्” सर्वार्थचि० राहुकेत्वोस्त्वारोहावरोहयोर्विशेषो नास्ति

**अवर्ग** पु० अकारसजातीयस्वराणां वर्गः अकार+प्रातिशाख्योक्तः वर्ग वा। १स्वरवर्णमात्रे, “अकचटतपयशाः वर्गाः” इतिकेरलम्। वर्गः समूहः न०ब०। २वर्गशून्ये त्रि०।

**अवर्ण** पु० अकारैकस्थानिको वर्णः शा०त०। ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिकाननुनासिकभेदेन अष्टादशसंख्यकेषु (अ)वर्णेषु “अदूत्यष्टादशानां संज्ञा” सि०कौ०। वर्ण्यतेऽनेन वर्णः प्रशंसा विरोधे न०त०। प्रशंसाविरोधिनि २अपवादे। “सोढुं न तत्पूर्व्वमवर्णमीशे” “न चावदद्भर्त्तुरवर्णमार्य्या” इति च रघुः।

**अवर्त्तन** न० वृत–ल्युट् अभावे न०त०। १वर्त्तनाभावे २अस्थितौ। वर्त्ततेऽनेन करणे ल्युट् वर्त्तनं जीविका न०ब०। ३जीविकाशून्ये त्रि०। [पदार्थे।

**अवर्त्तमान** त्रि० न०त०। १अस्थिते २भूते ३भविष्यति च

**अवर्द्धमान** त्रि० न वर्द्धमानः विरोधे न०त०। वृद्धिशून्ये क्षयिष्णौ। [न्यूने त्रि०।

**अवर्षण** न० अभावे न०त०। १वर्षणाभावे न०ब०। २वर्षण-

**अवलक्ष** पु० अवलक्ष्यते अव+लक्ष–घञ्। १श्वेतवर्णे अर्श० आद्यच्। २तद्वति त्रि०। अतोलोपे वलक्षोप्यत्र।

**अवलग्न** पु० अव+लग–क्त नि० दृढभावः लस्ज–क्त वा। (माजा) १देहमध्यभागे। २सम्बद्धमात्रे त्रि०। “विपुलतरोन्नतस्तनलोचनावलग्नम्” माघः।

**अवलत्तिका** स्त्री अव+लत–तिकन्। गोधायाम् उज्ज्व०।

**अवलम्ब** पु० अव+लबि–आधारे घञ्।१आश्रये। भावे घञ्। २द्रव्यान्तराश्रयणे। “सावलम्बगमना मृदुस्वना” रघुः। करणे घञ्। ३अवलम्बसाधने दण्डादौ।

**अवलम्बन** न० अव+लबि–भावे ल्युट्। आलम्बने पतनादिनिवारणाय द्रव्यान्तराश्रयणे “अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि” माघः। “सहिष्यते तत्प्रथमावलम्बनम्” कुमा०। “प्रस्थानविक्लवगतेरवलम्बनाय” शकु०। आधारे ल्युट्। २आश्रये। करणे ल्युट्। आलम्बसाधने ३दण्डादौ।

**अवलम्बित** त्रि० अव+लबि–कर्मणि क्त। १आश्रिते २आलम्बिते “अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत”-नैषध०। ३शीघ्रे न० ४तद्वति त्रि०जटा०। अव+लम्ब–कर्त्तरि क्त। ५अवतीर्णे।

**अवलम्बिन्** त्रि०अव+लबि–णिनि। १आलम्बनकर्त्तरि “यस्या भवानपरधूर्य्यपदावलम्बी” रघु०“स गोपतिं नन्दिभुजावलम्बी” कुमा० “अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम्” रघुः। २अवतारके उच्चस्थानात् अधःपातिनि। “भगवति मरीचिमालिनि अस्ताचलचूडावलम्बिनि” काद०।

**अवलिप्त** त्रि० अव+लिप–क्त। १गर्विते “न मूर्खैर्नावलिप्तैश्च